योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०९६

षण्णवतितमः सर्गः ९६

श्रीवसिष्ठ उवाच ।

इति ब्रह्मणि विश्रान्तिमवाप्य स शिखिध्वजः ।

मुहूर्तमासीत्संशान्तमना निर्वातदीपवत् ।। १

निर्विकल्पसमाधानपरेणाशु विविक्षितम् ।

स्वलीलयेति कुम्भेन झटित्येव प्रबोधितः ।। २

कुम्भ उवाच ।

राजन्नज्ञाननिद्रातः प्रबुद्धोऽसि शिवः स्थितः ।

कार्यं नास्तमयेनैव न चानस्तमयेन ते ।। ३

सकृदेव विभातात्मा नष्टानिष्टपदात्मकः ।

कलाकलननिर्मुक्तो जीवन्मुक्तोऽङ्ग सांप्रतम् ।। ४

श्रीवसिष्ठ उवाच ।

कुम्भेन बोधितस्त्वेवं स बभूवावबोधवान् ।

विनिर्गतो रराजोच्चैर्महामोहसमुद्गकात् ।। ५

विश्रान्तधीः क्षणेनैव पश्यन्दृश्यस्य वस्तुनः ।

असत्तामेव मुक्तात्मा लीलया समुवाच ह ।। ६

शिखिध्वज उवाच ।

ज्ञातप्रायमपीदं तु यत्पृच्छामि तदुच्यताम् ।

भूयो निपुणबोधाय मम मानद मोदद ।। ७

शिवे शान्ते निराभासे पदेऽनुल्लसितात्मनि ।

द्रष्टृदर्शनदृश्याख्यो विश्वात्मा प्रत्ययः कुतः ।। ८

कुम्भ उवाच ।

साधु पृष्टं महाराज राजसे वाथ भास्वरः ।

एतदेव हि ते शिष्टं ज्ञातुं यत्तदिदं श्रृणु ।। ९

यदिदं दृश्यते किंचिज्जगत्स्थावरजंगमम् ।

सर्वं सर्वप्रकाराढ्यं कल्पान्ते तद्विनश्यति ।। १०

ततः स्तिमितगम्भीरं न तेजो न तमस्ततम् ।

महाकल्पविलासान्ते सत्सारमवशिष्यते ।। ११

चिन्मात्रममलं शान्तमाभातं परमं नभः ।

समस्तकलनोन्मुक्तं युक्तं परमया धिया ।। १२

यदेकोदितमत्यच्छं शान्तमाततमुज्ज्वलम् ।

परमात्मात्मकं तेजस्तिमितं ज्ञप्तिमात्रकम् ।। १३

अप्रतर्क्यमविज्ञेयं समं शिवमनिन्दितम् ।

ब्रह्मनिर्वाणमापूर्णमापूर्णोदितसंविदा ।। १४

अणीयसामणीयश्च स्थविष्ठं च स्थवीयसाम् ।

गरीयसां गरिष्ठं च श्रेष्ठं च श्रेयसामपि ।। १५

ईदृशं तत्परं सूक्ष्मं तस्याग्रे यदिदं नभः ।

अणोः पार्श्वे महामेरुरिव स्थूलात्म लक्ष्यते ।। १६

ईदृशं तत्परं स्थूलं यस्याग्रे यदिदं जगत् ।

परमाणुवदाभाति क्वचिदेव न भाति च ।। १७

विश्वात्मकचनं नाम पदेऽसंभववेधसः ।

तदहंवेदनं विद्धि विराडात्मा जगत्स्थितम् ।। १८

वातस्य वातस्पन्दस्य यथा भेदो न विद्यते ।

शून्यत्वखत्वोपमयोश्चिन्मात्राहंत्वयोस्तथा ।। १९

जलेऽस्ति देशकालान्ते यथोर्म्यादि सकारणम् ।

परेऽसद्देशकालान्ते तथा जगदकारणम् ।। २०

हेम्न्यस्ति देशकालान्ते कटकादि सकारणम् ।

ब्रह्मण्यदेशकालान्ते तथा जगदकारणम् ।। २१

ईदृशं तद्वरिष्ठं च जगद्राज्यं तदक्षतम् ।

न द्वैतममलं शान्तं जगत्तृणलवायते ।। २२

ईदृशं तत्परं श्रेयस्तस्मिन्सति यदीश्वरे ।

जगत्पदार्थसार्थश्रीः सा सत्तामेति वेदनात् ।। २३

तत्सारमेकमेवेह विद्यते भूपते ततम् ।

एकमेकान्तचित्कान्तं नैकमप्यद्वितावशात् ।। २४

तस्माद्द्वितीया कलना काचिन्नाम न विद्यते ।

आत्मतत्त्वमलं भातं तदेवापूर्णमक्षयम् ।। २५

संस्थितं सर्वदा सर्वं सर्वाकारमिवोदितम् ।

अदृश्यत्वादलभ्यत्वान्न तत्कार्यं न कारणम् ।। २६

प्रत्यक्षादेरगम्यत्वात्किमप्येव तदुत्तमम् ।

सर्वं सर्वात्मकं सूक्ष्ममच्छानुभवमात्रकम् ।। २७

आख्यानाख्यास्वरूपस्य निराभासप्रभादृशः ।

सतो वाप्यसतो वाथ कथं कारणता भवेत् ।। २८

यद्वै न कस्यचिद्बीजमनाख्यत्वान्न कारणम् ।

न किंचिज्जायते तस्मात्प्रमाणादि ततात्मनः ।। २९

अकर्तृकर्मकरणं सत्यं चिद्धनमक्षतम् ।

आत्मरूपमनाभासं स्वयंवेदनमक्षतम् ।। ३०

तस्मान्न जायते किंचित्परस्माद्ब्रह्मणो मुने ।

कथं किं लभ्यते केन यथोर्म्यादि सकारणम् ।। ३१

परेऽसद्देशकालान्ते तथा जगदकारणम् ।

शिखिध्वज उवाच ।

जलादौ यत्तरङ्गादि तत्सकारणमस्ति हि ।। ३२

परे जगदहंतादि नाकारणमवैम्यहम् ।

कुम्भ उवाच ।

इदानीं तत्त्वतो ज्ञातमेतत्सत्यं महीपते ।। ३३

इदं जगदहंतादि नेह किंचिन्न विद्यते ।
जगच्छब्दार्थरहितं जगदस्ति शिवात्मकम् ।। ३४
व्योम्न्येव निर्मितं शान्तं व्योम्ना सूक्ष्मतरेण च ।
यथा नभसि शून्यत्वं तथेदं जगदीश्वरे ।। ३५
सदृशं स्वस्वरूपेण न वा रूपेण केनचित् ।
एवंरूपं जगदिदं सम्यग्ज्ञातं शिवं भवेत् ।। ३६
सम्यग्ज्ञानप्रभावेण विषमप्यमृतायते ।
असम्यग्ज्ञातमशिवं जगद्दुःखप्रदं परम् ।। ३७
विषबुद्ध्यामृतमपि भुक्तं विषरसायते ।
ईदृशश्च यथा वेत्ति यद्यदेष चिदीश्वरः ।। ३८
तत्तथैवाशु भवति तादृग्रूपतया शिवः ।
यथा ज्वाला भ्रमाज्जाता विचित्राकारविभ्रमैः ।। ३९
तिष्ठत्यनन्यरूपैव ब्रह्मसत्ता तथैव हि ।
यत्परं चित्स्वरूपेण स्थितमात्मनि मन्थरम् ।। ४०
तत्तेन देहदेह्यादिर्जगदादीव लक्ष्यते ।
केवलं परमेवेत्थं परमं भासते शिवम् ।। ४१
अतो जगदहंतादि प्रश्न एवेति नोचितः ।
यद्वस्तु विद्यमानं सत्प्रश्नस्तत्र विराजते ।। ४२
प्रेक्षितं यत्तु नास्त्येव प्रेक्षाप्रश्नेन तत्र किम् ।
संनिवेशं विना सत्ता यथा हेम्नो न विद्यते ।। ४३
तथा जगदहंभावं विना नेशस्य संस्थितिः । ।
अकारणत्वान्नास्तीदं ब्रह्मैवेत्थं विजृम्भते ।। ४४
अजृम्भमाणमेवेदं जगत्त्वेनेव संस्थितम् ।
यन्मया एव तेनैव मिथः संप्रेरिताशयम् ।। ४५
चमत्कुर्वन्त्यमी भावाः पञ्चके मिथुनौघवत् ।
चिन्मात्र एव चिन्मात्रं चिन्मात्रेणावधीयते ।। ४६

नानात्मनैव नानेव स्वात्मज्ञानात्मनात्मवत् ।

पूर्णात्पूर्णान्युद्धरन्ति पूर्णात्पूर्णानि चक्रिरे ।। ४७

भवन्ति पूर्णात्पूर्णानि पूर्णमेवावशिष्यते ।

चिन्मात्रमेव कचति यच्चिन्मात्रमयात्मनि ।। ४८

अकचित्वैव तन्नाम कचितं सर्गवेदनम् ।

अहं चिता चिदेवादौ भवतीव स्वयं ततः ।। ४९

अभवन्त्येव रूपं स्वमत्यजन्ती निरामयम् ।

तेजोमयमनाद्यन्तं मनोरूपमनन्तकम् ।। ५०

सम्राट्संसारमाभासि भवतीव स्वयं वपुः ।

पश्यत्यथ सदेवेदं स्वरूपत्वात्सदेव वा ।

भावनाद्भूततामेति दृश्यं भवति च क्षणात् ।। ५१

शान्तं जगत्प्रसररूपतया स्वभाव-

शब्दार्थमुक्तमिदमव्यपदेश्यमेकम् ।

वस्तु स्थितं निजचमत्करणावलोक-

रूपं जगत्स्वरहितानुभवात्मतत्त्वम् ।। ५२

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मो० निर्वा० पू० चू० शिखिध्वजावबोधनं नाम षण्णवतितमः सर्गः ।। ९६ ।।